# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- नवम्बर/दिसम्बर-२०१६

कक्षा – **शास्त्री-०३ सेमेस्टर-०५** **प्रश्नपत्रम्- ०८** गुणाः - ७०

विषयः– नव्यव्याकरणम् कोड – CE-3.5.10 समयः – ११:०० तः ०२:००

दिनाङ्कः – ०२/१२/२०१६ ग्रन्थः – पातञ्जलमहाभाष्यम्, उणादि सूत्राणि च

---

**प्रथमान्वितिः (युनिट- १)**

**प्रश्नः १ अधोनिर्दिष्टेषु द्वयोः व्याख्यानम् विधेयम्** **08**

**(क)** प्रक्रियादशायां अकारस्य विवृतोपदेशे "अ अ" इति सूत्रस्य प्रयोजनं प्रतिपादयत

**(ख)** लृकारोपदेशस्य प्रयोजनं वदता वार्तिककारेण कथं खण्डनं कृम् इति लिखत।

**(ग)** वर्णग्रहणे वर्णैकदेशाग्रहणं न भवति तस्मिन् पक्षे दोषनिराकरणं कुरुतं।

**प्रश्नः २ अधोनिर्दिष्टयोरेकस्य विषये निबन्धः लेख्यः।** **08**

**(क)** हकारद्वयस्यप्रयोजनं प्रतिपदयत।

**(ख)** नकारद्वयस्यानुबन्धने प्रयोजनं विलिख्यि प्रमाणीभूतां परिभाषां लिखत

**प्रश्नः ३ द्वयोः टिप्पणी कार्या।** **04**

**(क)** अक्षरसमाम्नायस्य ज्ञानेन स्वर्गप्राप्तिः भवति न वा।

**(ख)** प्रत्याहारेषु अनुबन्धानां ग्रहणं कस्मात्न भवति ?

**(ग)** "अ अ" इति सूत्रेण किं ज्ञायते ?

**(घ)** पाणिनीये व्याकरणे कति प्रत्याहाराः ?

**प्रश्नः ४ चतुर्णाम अतिलघूत्तरं देयम्** **05**

**(क)** के आयोगवाहा ?

**(ख)** के अर्थवन्तः वर्णाः ?

**(ग)** आह्निकशब्दस्य का व्युत्पत्तिः ?

**(घ)** प्रत्याहार शब्दस्य व्याख्यानम् किम् ?

**(ङ)** प्रयत्नशब्दस्य का व्युत्पत्तिः ?

**(च)** अक्षरसमाम्नायः नाम किम् ?

**(छ)** अपशब्दं न प्रयुञ्जीतइत्यस्य कोऽभिप्रायः ?

**द्वितीयान्वितिः (युनिट- २)**

**प्रश्नः ५ अधोनिर्दिष्टेषु द्वयो व्याख्यानं विधेयम्।** **08**

**(क)** तद्भावितातद्भावितानामादैचां वृद्धिः स्वीकृता वा न वा ?

**(ख)** इक्-परिभाषा स्वतन्त्रपरिभाषा अस्ति न वा ?

**(ग)** "वृद्धिरादैच्" इत्यत्र कुत्वस्य कथं समाधानं कृतम् ?

**प्रश्नः ६ कस्यापि एकस्य वाख्यानं विधेयम्।** **08**

**(क)** आचार्याचारात् संज्ञा सिद्धिः

**(ख)** संज्ञधिकारः संज्ञासम्प्रत्ययार्थः

**(ग)** "इको गुणवृद्धिः"

**प्रश्नः ७ अधोनिर्दिष्टेषु द्वयोः टिप्पणी लेख्या।** **04**

(क) भेदकत्वात् गुणस्य

(ख) संज्ञया विधाते नियमः।

(ग) सर्वादिशप्र सङ्गश्चानिगन्तस्य।

(घ) वृद्धिग्रहणमुत्तरार्थम्

**प्रश्नः ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं देयम्** **05**

(क) "नेटि" सूत्रम् किंकरोति ?

(ख) पुगन्तलघूपस्य च इति सूत्रं कि करोति ?

(ग) मेद्यति – अत्र गुणः केन सूत्रेण भवति ?

(घ) बाभ्रव्य इत्यत्र अत्र किम् कार्यं भवति ?

(ङ) सुश्रुत अत्र गुण भवति न वा ?

(च) आदैचां संज्ञा क्रियते न वा ?

(छ) "इको गुणवृद्धी" सूत्रे 'गुणवृद्धी इति पदे कः समासः?

**तृतीयान्वितिः (युनिट - ३)**

**प्रश्नः ९ अधोनिर्दिष्टेषु द्वयोः व्याख्यानम् विधेयम्?** **08**

(क) कृवापाजिमि :- इति सूत्रं प्रपूर्य सोदाहरणं प्रयोगसिद्धिं कुरुत।

(ख) भूमृशीतॄः- सोदाहरं प्रयोगसिद्धिपूर्वकं सूत्रं प्रणयत।

(ग) स्वरुशङ्कुपीयु :- इदं सूत्रं प्रपूर्य सोदाहरणं प्रयोसिद्धिं कुरुत।

**प्रश्नः १० अधोनिर्दिष्टेषु चतुर्णां प्रयोगसिद्धं कुरुतं** **08**

१-मयूरः, २-पतेरः, ३-भवान्, ४-तडित्, ५-छगलः।

**प्रश्नः ११ द्वयोरेकस्य टिप्पणी कार्या।** **02**

(क) पथः कित्सम्प्रसारणं च।

(ख) इण्शीभ्यां वन्।

**प्रश्नः १२ चतुर्षु द्वयोः अतिलघूत्तरं देयम्।** **02**

(क) उणादिशब्दस्य कोऽर्थः ?

(ख) उणादिसूत्रे प्रथमपादे कति सूत्राणि सन्ति

(ग) उण्-प्रत्यय-विधायकं सूत्रं किम्?

(घ) ञुण्-प्रत्यय विधायकं सूत्रं किम्?

***